ते च यथा,—
"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः ॥"
प्रलयो मूर्च्छा । इति भरतः ॥

सात्त्विकः, त्रि, (सत्त्वेन निर्वृत्तः । तेन निर्वृत्तमिति ठञ् ।) सत्त्वगुणनिष्पादितः । इत्यमरः । १ । ७ । २६ ॥ सत्त्वं मनोगुण आश्रयो वा तेन निष्पादितः सात्त्विकः स्वेदादिः । सत्त्वशब्दात् ठघे कादिति ष्णिकः । इति भरतः ॥ * ॥ सत्त्वगुणयुक्तः । तद्विवरणं यथा, गीतायाम् ।१७।४।
"यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥"
सात्त्विकयज्ञो यथा, गीतायाम् । १७ । ११ ।
"अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥"
सात्त्विकतपो यथा, तत्रैव । १७ । १७ ।
"श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥"
सात्त्विकदानं यथा, तत्रैव । १७ । २० ।
"दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥"
सात्त्विकयोगो यथा, तत्रैव । १८ । ९ ।
"कार्य्यमित्येव यत् कर्म्म नियतं क्रियतेऽर्ज्जुन ।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः ॥"
सात्त्विकज्ञानं यथा, तत्रैव । १८ । २० ।
"सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥"
सात्त्विककर्म्म यथा, तत्रैव । १८ । २३ ।
"नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म्म यत्तत् सात्त्विकमुच्यते ॥"
सात्त्विकबुद्धिर्यथा, तत्रैव । १८। ३० ।
"प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये ।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥"
सात्त्विकी धृतिर्यथा, तत्रैव । १८ । ३३ ।
"धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ !
सात्त्विकी ॥"
सात्त्विकसुखं यथा, तत्रैव । १८ । ३७ ।
"यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥"
सात्त्विकपुराणानि यथा,—
"वैष्णवं नारदीयञ्च तथा भागवतं शुभम् ।
गारुड़ञ्च तथा पाद्मं वाराहं शुभदर्शने ।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥"
सात्त्विकस्मृतयो यथा,—
"वाशिष्ठञ्चैव हारीतं व्यासं पाराशरं तथा ।
भारद्वाजं काश्यपञ्च सात्त्विका मुक्तिदाः
शुभाः ॥"
इति पाद्मोत्तरखण्डे ४३ अध्यायः ॥
सात्त्विकप्रियाहारा यथा,—
"आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः
सात्त्विकप्रियाः ॥"
इति श्रीभगवद्गीतायाम् । १७ । ८ ॥
सात्त्विककर्त्ता कर्तृशब्दे सात्त्विकाहार आहारशब्दे च द्रष्टव्यः ॥

सात्त्विकी, स्त्री, (सात्त्वं सत्त्वगुणोऽस्त्यस्या इति । सात्त्व + ठन् । ङीप् ।) दुर्गा । इति शब्दरत्नावली ॥ पूजाविशेषः । यथा,—
"शारदी चण्डिकापूजा त्रिविधा परिगीयते ।
सात्त्विकी राजसी चैव तामसी चेति तत्
०त्रयम् ॥"
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः ।
माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम् ।
पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनास्तथा ॥"
इति दुर्गोत्सवतत्त्वम् ॥

सात्म्यं, त्रि, सुखजनकम् । आत्मनो हितं कर्म्म आत्म्यं आत्म्येन सह वर्त्तमानं सात्म्यम् । इति भैषज्यरत्नावली ॥ (यथा, सुश्रुते । १ ।४५ ।
"सर्व्वप्राणभृतां तस्मात् सात्म्यं क्षीरमिहोच्यते ॥"
"सात्म्यं नाम तद्यत् सातत्येनोपसेव्यमानमुपशेते । तत्र ये घृतक्षीरतैलमांसरससात्म्याः सर्व्वरससात्म्याश्च ते बलवन्तः क्लेशसहाः चिरजीविनश्च भवन्ति । रूक्षनित्याः पुनरेकरससात्म्याश्च ये ते प्रायेणाल्पबलाश्चाक्लेशासहाः अल्पायुषोऽल्पसाधनाश्च ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥
"यो रसः कल्पते यस्य सुखायैव निषेवितः ।
व्यायामजातमन्यद्वा तत्सात्म्यमिति निर्द्दिशेत् ॥"
इति सुश्रुते सूत्रस्थाने ३६ अध्याये ॥
क्ली, ऐक्यम् । यथा, भागवते ।६।१८।२०
"इन्द्रेण प्रापिताः सात्म्यं किं तत् साधु
कृतं हि तैः ॥"
सारूप्यम् । यथा, तत्रैव । ७ । १० । ४० ।
"नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिन्तया ययुः ॥")

सात्यकिः, पुं, (सत्यकस्यापत्यं पुमानिति । इञ् ।) वृष्णिवंशीयसत्यकपुत्त्रः । स तु श्रीकृष्णस्य सारथिः । तत्पर्य्यायः । शैनेयः २ शिनेर्नप्ता ३ युयुधानः ४ । इति त्रिकाण्डशेषः ॥ योधः ५ । इति जटाधरः ॥ (अयं हि अर्ज्जुनस्य शिष्य आसीत् भारतयुद्धे युधिष्ठिरपक्षमाश्रित्य तुमुलं युद्धं विधाय च हतेऽपि निखिलबले वासुदेवेन पाण्डवैश्च सह जीवित आसीत् । तथाहि महाभारते अश्वत्थामवाक्ये । १० । ९ । ४७ ।
"सप्त पाण्डवतः शेषा धार्त्तराष्ट्रास्त्रयो वयम् ।
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः ।
अहञ्च कृतवर्म्मा च कृपः शारद्वतस्तथा ॥")

सात्यवतः, पुं, (सत्यवत्यां भवः । अण् ।) वेदव्यासः । इति त्रिकाण्डशेषः ॥

सात्यवतेयः, पुं, (सत्यवत्या अपत्यं पुमान् । सत्यवती + ढक् ।) सत्यवतीसुतः । वेदव्यासः । इति हलायुधः ॥

सादः, पुं, (सद + घञ् ।) विषादः । (यथा, रघुः । ३ । २ ।
"शरीरसादादसमग्रभूषणा
मुखेन सालक्ष्यत लोध्रपाण्डुना ॥")
शरणम् । गतिः । (यथा, बृहत्संहितायाम् । ४६ । ६० ।
"यानं वाहवियुक्तं यदि गच्छेन्न व्रजेच्च वाहनयुतम् ।
राष्ट्रभयं भवति तदा चक्राणां सादभङ्गे च ॥")

सादनं, क्ली, (सद् + स्वार्थे णिच् + ल्युट् ।) सदनम् । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । १ । १५४ । २८ ।
"अहमेको नयिष्यामि त्वामद्य यमसादनम् ॥")

सादनी, स्त्री, (सादयन्ति रोगा अनया । सद + णिच् + करणे ल्युट् । ङीप् ।) कटुकी । इति राजनिर्घण्टः ॥

सादिः, पुं, (सद गतौ + "वसिवपियजीति ।" उणा० ४ । १२४ । इति इञ् ।) सारथिः । इति हेमचन्द्रः ॥ योद्धा । इत्युणादिकोषः ॥ अवसन्नः । वायुः । इति संक्षिप्तसारोणादिवृत्तिः ॥

सादितः, त्रि, (सद + णिच् + क्तः ।) विषादितः । (यथा, रघुः । ७ । ४४ ।
"यैः सादिता लक्षितपूर्व्वकेतून्
तानेव सामर्षतया निजघ्नुः ॥")
शरणप्रापितः । गमितः । इति ण्यन्तसदधातोः क्तप्रत्ययेन निष्पन्नः ॥

सादी, [न्] पुं, (सद गतौ + णिनिः ।) अश्वारूढः । इत्यमरः । २ । ८ । ६० ॥ (यथा, रघुः ।७।४७।
"पूर्व्वं प्रहर्त्ता न जघान भूयः
प्रतिप्रहाराक्षममश्वसादी ॥")
गजारोहः । रथारोहः । इति मेदिनी ॥

सादृश्यं, क्ली, (सदृशस्य भावः । सदृश + ष्यञ् ।) सदृशत्वम् । तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वम् । यथा, चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यम् । इति सिद्धान्तमुक्तावली ॥ * ॥ अथ सादृश्यानि । वेण्याः सर्पः १ भ्रमरश्रेणिः २ । केशपाशस्य चामरः १ मयूरपुच्छः २ । धम्मिल्लस्य विधुन्तुदः १ अन्धकारः २ । सीमन्तस्य मेघः १ पन्थाः २ दण्डः ३ । ललाटस्य अष्टमीचन्द्रः १ फलकम् २ । कपोलस्य चन्द्रः १ मुकुरस्थलम् २ । भ्रुवोः खड्गः १ धनुर्यष्टिः २ रेखा ३ पल्लवः ४ वल्लिः ५ । दृशोः चकोरचञ्चुः १ हरिणचक्षुः २ मदिरा ३ खञ्जनः ४ अञ्जनम् ५ कुमुदम् ६ नीलपद्मम् ७ प्रोष्ठीमत्स्यः ८ । कर्णस्य दोला १ पाशः २ । नासायाः वंशः १ केतकीपुष्पकण्टकः २ अधोमुखतूणीरः ३ चञ्चुः ४ तिलपुष्पम् ५ दण्डः ६ । अधरस्य नवपल्लवम् १ बिम्बफलम् २ प्रवालः ३ । दन्तानाम् मुक्ताश्रेणिः १ कुन्दपुष्पम् २ दाड़िमबीजम् ३ हीरकम् ४ । स्मितस्य ज्योत्स्ना १ पुष्पम् २ पीयूषम् ३ । श्वासस्य पद्मगन्धः १